संस्कृत वार्ताः

16.05.2025

सायम् :- 6:20

<u>मुख्यवार्ता:</u>

· भारतेन अन्ताराष्ट्रिय-मुद्राकोषाय उक्तं यत् सः पाकिस्तानाय दीयमानायाः वित्तीय-सहायतायाः विषये पुनर्विचारं कुर्यात्।

· रक्षा-मन्त्री राजनाथ-सिंहः अवोचत् यत् पाकिस्तानाय आर्थिक-सहायता प्रदानस्य अर्थः आतङ्कवादि-गतिविधिभ्यः एव धनोपलब्धता वर्तते।

· देशस्य शीर्ष-प्रमुख-वाणिज्य-समावाया: तुर्की-अजरबैजान-देशयोः सह यात्रां पर्यटनं च समेत्य सर्वविधव्यापार-बहिष्कारस्य निर्णयं कृतवन्तः।

· तोमर- क्षेपक: नीरज चोपडा कतरस्य दोहायां प्रथम डायमंड लीग इति स्पर्धायां अद्य क्रीडिष्यति।

· बी.सी.सी.आई. इति भारतीय-क्रिकेट-नियामकाभिकरणेन इग्लैण्ड देशेन सह आगामि शृङ्लायै महिला-क्रिकेट-दलस्य घोषणा कृता।

<u>भारतम् अन्ताराष्ट्रिय-मुद्राकोषः</u>

भारतेन उक्तं यत् अन्ताराष्ट्रिय-मुद्राकोषेन पाकिस्तानाय दीयमानायाः वित्तीय-सहायतायाः विषये पुनर्विचारः करणीयः। गुजरातस्य भुज-स्थले वायुसेना-स्थानके सैनिकान् सम्बोधयन् रक्षा-मन्त्री राजनाथ-सिंहः अवोचत् यत् अस्याः वित्तीय-सहायतायाः बृहत्-भागः पाकिस्तानेन आतङ्कवादस्य संरचनायां प्रयोक्ष्यते। अधुना पाकिस्तानाय कीदृशी अपि आर्थिक-सहायता प्रदानस्य अर्थः आतङ्कवादि-गतिविधिभ्यः धनोपलब्धता वर्तते।

रक्षामन्त्री राजनाथसिंहः सिन्दूराभियाने भारतीय-वायुसेनायाः त्वरित-निर्णायक-कार्याचरणस्य प्रशंसा-कुर्वन् अवदत् यत् अनेन देश-विदेशे च समेपि भारतीयाः गौरवान्विताः। वायुसेनायै पाकिस्ताने स्थितातङ्क-संरचनायाः समाप्तये केवलं त्रयोविंशतिः निमेषाः एव पर्याप्ताः आसन्। रक्षामन्त्री अवोचत् यत् अनेन अभियानेन आतङ्कवादं विरूध्य कठोर-सन्देशः प्रदत्तः अथ च

भारतस्य सैन्य-शक्तिः सन्नद्धता च प्रदर्शिता। अपि च सिन्दूराभियाने भारतीय-सेनया न केवलं शत्रुषु स्वस्य वर्चस्वं स्थापितम् अपितु शत्रूणां नाशः अपि विहितः।

<u>कैट-बहिष्कारः</u>

देशस्य पञ्चविंशत्यधिकैक-शततोप्यधिकाः शीर्ष-प्रमुखा वाणिज्य-नेतारः तुर्की-अजरबैजान-देशयोः सह यात्रां पर्यटनं च समेत्य सर्वविधव्यापार-बहिष्कारस्य निर्णयं कृतवन्तः। अद्य नवदिल्ल्याम् अखिल-भारतीय-व्यापार-परिसङ्घेन आहूते राष्ट्रिय-व्यापारनेतृ-सम्मेलने एषः निर्णयः स्वीकृतः। एकस्मिन् वक्तव्ये सी.ए.आई.टी इत्यनेन उक्तं यत्, यदा भारतं संवेदनशीलं गम्भीरं च राष्ट्रिय-सुरक्षास्थितिं सम्मुखीकरोति स्म तस्मिन् समये तुर्की-अजरबैजान-देशाभ्यां पाकिस्तानस्य पूर्णसमर्थनं कृतम्। सद्यः एव कृतस्य वृत्तेः प्रतिक्रियारूपेण एषः संकल्पः स्वीकृतः। तत्र उक्तं यत्, भारतीय-व्यापार-समुदायः एतत् विश्वासघातरूपेण पश्यति, विशेषतः पूर्वं संकटस्थितौ भारतेन द्वयोः देशयोः कृते मानवीयं कूटनीतिकं च समर्थनं प्रदत्तम्। सभां सम्बोधयन् C.A.I.T इत्यस्य महासचिवः संसद-सदस्यः च प्रवीणखण्डेलवालः अवदत् यत् दुर्भाग्यं यत् भारतस्य सद्भावनायाः, सहायतायाः, सामरिक-समर्थनस्य च लाभं प्राप्तवन्तौ तुर्की-अजरबैजान-देशौ अधुना पाकिस्तानस्य साहाय्यं कृतवन्तौ। सः अवदत् यत् तयोः स्थितिः न केवलं भारतस्य सार्वभौमत्वं राष्ट्रहितं च आहतं करोति अपितु चत्वारिंशदधिकैक-शतकोटि-भारतीयानां भावनानां प्रत्यक्षतया अपमानं करोति।

<u>राष्ट्रपतिः ज्ञानपीठ-पुरस्कारः</u>

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य संस्कृत-विदुषे जगद्गुरु-रामभद्राचार्याय त्रयोविंशत्यधिक-द्वि-सहस्र-तम-वर्षस्य कृते नवदिल्ल्याम् अष्टपञ्चाशत् तमं ज्ञानपीठपुरस्कारं प्रदत्तवती। जगद्गुरु-रामभद्राचार्यः प्रख्यातः उर्दू कविः गीतकारः गुलजारः च अस्य प्रतिष्ठितपुरस्काराय चितौ स्तः। साहित्यक्षेत्रे उत्कृष्टयोगदानाय प्रख्यात-जनाः अस्मिन् पुरस्कारेण सम्मानिताः सन्ति। अस्मिन् अवसरे प्रवदन् राष्ट्रपतिः उभयोः अभिनन्दनं कृतवती ।

## निर्वाचनायुक्त: बिहारे

निर्वाचनायुक्त: डॉक्टर विवेक-जोशी आगामि-बिहार-विधानसभा- निर्वाचनानां सज्जताम् समीक्षितुं गतदिने चतुर्दिवसीय-बिहार यात्रायां प्रतिष्ठित:। निज यात्रावधौ असौ व्यवस्थां मतदातृभ्य: सौविध्यान् सुरक्षा स्थितिं च ज्ञास्यति। सममेव असौ ई.वी.एम. यन्त्राणां प्रथमस्तरीय-निरीक्षणम् अपि अवलोकयिष्यति।

## सिक्किम-स्थापना दिवसः

राष्ट्रपतिः द्रौपदी मुर्मुः प्रधानमन्त्री नरेन्द्र-मोदी च सिक्किमस्य जनान् तेषां राज्य-दिवसावसरे शुभकामनाः प्रदत्तवन्तौ। सामाजिक-सञ्चार-पटले राष्ट्रपतिना मुर्मु वर्यया उक्तं यत् सिक्किमः स्वस्य असीम-प्राकृतिक-सुन्दरतायै समृद्ध-सांस्कृतिक-रिक्थाय जनानाम् उत्साहाय च व्यापक-रूपेण प्रशंसितो वर्तते। राष्ट्रपतिनोक्तं यत् राज्येन भारतस्य सर्वाधिक-पर्यावरणं प्रति जागरूक-राज्यरूपेण प्रकृत्या सह सामंजस्यपूर्ण सह-अस्तित्वं प्रदर्शयिता सतत-विकासस्य उल्लेखनीयोदाहरणानि स्थापितानि।

प्रधाननमन्त्री नरेन्द्र मोदी अवोचत् यत् सिक्किमः शांत-सुंदरता-समृद्ध- सांस्कृतिक-परम्पराणाम् अथ परिश्रमी जनैः सम्बद्ध: अस्ति। सामाजिक -संचार-पटले श्रीमोदी अवोचत् यत् राज्येन विविध क्षेत्रेषु प्रगति: कृता। तेन इदमपि उक्तं यत् अयम् अवसर: अतो अपि विशिष्ट: अस्ति यतो हि सिक्किमस्य स्थापनायाः पञ्चाशत्-तमः वर्षः अस्ति। प्रधानमन्त्रिणा राज्यस्य नागरिकाणां समृद्धेः कामना कृता।

## शाह-उद्घाटनम्

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य उक्तवान् यत् सिन्दूराभियानं प्रधानमन्त्रिणः नरेन्द्रमोदिनः दृढ-राजनितिकेच्छायाः, गुप्तचर-विभागानां समीचीनसूचनायाः, अस्माकं त्रयाणां सैन्यबलानाम् अचूक-प्रहारक्षमतायाः च अद्वितीयं प्रतीकम् अस्ति। अद्य राजधान्यां नवदिल्ल्यां समेकित-गुप्तसूचनाप्रसारयितुं नूतनस्य बहुविभागीयकेन्द्रस्य उद्घाटनानन्तरं एतत् अवदत् गृहमन्त्री।

## नीरज चोपडा

भारतस्य द्विवारम् ओलम्पिक स्पर्धायां पदक विजेता विश्व विजेता च तोमर- क्षेपक: नीरज चोपडा कतरस्य दोहायां प्रथम डायमंड लीग इति स्पर्धायां अद्य क्रीडिष्यति।

## क्रिकेट

बी.सी.सी.आई. इति भारतीय-क्रिकेट-नियामकाभिकरणेन इग्लैण्ड देशेन सह आगामि शृङ्लायै महिला-क्रिकेट-दलस्य घोषणा कृता। जून मासस्य अष्टाविंशति: दिनात् जुलाई मासस्य द्वाविंशति: दिनांकं यावत् भारतीय-दलं तत्र पञ्च विंशति: प्रतिविंशति: तिस्र: एकदिवसीय-स्पर्धा: च खेलिष्यति।

।। इति वार्ता: ।।